Click here to go back

Rahu kavacha - Gujarati




# અથ રાહુ કવચં

ઓં અસ્ય શ્રી રાહુ કવચ મહામંત્રસ્ય ચંદ્ર ઋષિઃ| અનુષ્ટુપ્છંદઃ| રાહુર્દેવતા| નીં બીજં| હ્રીં શક્તિઃ| કાં કીલકં| મમ રાહુગ્રહ પ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ|| (કરન્યાસઃ) રાં અંગુષ્ઠાભ્યાં નમઃ| રીં તર્જનીભ્યાં નમઃ| રૂં મધ્યમાભ્યાં નમઃ| રૈં અનામિકાભ્યાં નમઃ| રૌં કનિષ્ઠિકાભ્યાં નમઃ| રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ|| (અંગન્યાસઃ) રાં હૃદયાય નમઃ| રીં શિરસે સ્વાહા| રૂં શિખાયૈ વષટ્| રૈં કવચાય હું| રૌં નેત્રત્રયાય વૌષટ્| રઃ અસ્ત્રાય ફટ્| ભૂર્ભુવસ્સુવરોમિતિ દિગ્ભંધઃ|| (ધ્યાનં) પ્રણમામિ સદા રાહું સર્પાકારં કિરીટિનં| સૈંહિકેયં કરાળાસ્યં ભક્તાનામભયપ્રદં| રાહું ચતુર્ભજઃ ચર્મશૂલ ખડ્ગવરાન્વિતં| કૃષ્ણાંબરધરંમાલ્યં કૃષ્ણગંધાનુલેપનં| ગોમેધિક વિભૂષંચ વિચિત્ર મકુટોજ્વલં| કૃષ્ણસિંહરથારૂઢં મેરુંચૈવ પ્રદક્ષિણં|| નીલાંબર શિરઃ પાતુ લલાટં લોકવંદિતઃ| ચક્ષુષી પાતુ મે રાહુઃ શ્રોત્રે મેર્ધશરીરવાન્| નાસિકાં મે કરાળાસ્ય શૂલપાણિર્મુખં મમ| જિહ્વાં મે સિંહિકા સૂનુઃ કંઠં મે કષ્ટનાશનઃ| ભુજંગેશો ભુજૌ પાતુ નીલમાલ્ય કરૌ મમ\ પાતુ વક્ષસ્તમમો મૂર્તિઃ પાતુ નાભિં વિધુંતુદઃ| કટિં મે વિકટઃ પાતુ ઊરૂ મે સુરપૂજિતઃ| સ્વર્ભાનુર્જાનુની પાતુ જંઘે મે પાતુ ચાપ્યગુઃ| ગુલ્પૌ ગ્રહાધિપઃ પાતુ નીલચંદન ભૂષિતઃ| પાદૌ નીલાંબરઃ પાતુ સર્વાંગ સિંહિકાસુતઃ| રાહુરિદં કવચમીપ્સિતવસ્તુવં યો ભક્ત્યાપઠત્યનુદિનં નિયતશ્શુચિસ્સન્| પ્રાપ્નોતિ કીર્તિમતુલં ચ શ્રેયસ્સંમૃદ્ધિં આરોગ્યં આયુર્વિજયં પ્રસાદાત્| ઇતિ પદ્મ પુરાણે રાહુ કવચં||

Please consider the environment - do not print unless essential

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back